सुकोली, स्त्री, (सुशोभना कोली) क्षीरकाकोली। इति रत्नमाला ॥ शोभनवदरी च ॥

सुकोशकः, पुं, (सु शोभनः कोशो यस्य।) कोशाम्रः। इति राजनिर्घण्टः ॥

सुख, त् क तत्क्रतौ। इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट्।) तत्क्रतिः सुखक्रिया। "श्रीजयदेवकवेरिति गीतं सुखयतु केशवपदमुपनीतम्। इति दुर्गादासः ॥

सुखं, क्ली, (सुखयतीति। सुख+अच्।) आत्मवृत्तिगुणविशेषः। इति नैयायिकाः ॥ मनसो धर्म्मः। इति वेदान्तिकाः ॥ तत्पर्य्यायः। सुत् २ प्रीतिः ३ प्रमदः ४ हर्षः ५ प्रमोदः ६ आमोदः ७ संमदः ८ आनन्दथुः ९ आनन्दः १० शर्म्म ११ शातम् १२। इत्यमरः ।१।४।२५ ॥ मदः १३ भोगः १४ रभसः १५ निर्वृतिः १६ धृतिः १७ वीचिः १८। इति जटाधरः ॥ संमदः १९ मोदः २० नन्दथुः २१ नन्दः २२ मुदा २३ सौख्यम् २४ उपजोषम् २५ आनन्दम् २६ जोषम् २७। इति शब्दरत्नावली ॥ न्यायमते जगतां काम्यं धर्म्मजन्यमिदम्। यथा,—

"सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यते।
अधर्म्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥"

तस्य मनोगोचरत्वं यथा,—

"मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥"

इति भाषापरिच्छेदः ॥ * ॥

"सुखं चतुर्व्विंशतिगुणान्तर्गतगुणविशेषः। तच्च नित्यं जन्यञ्च। नित्यं परमात्मनो विशेषगुणान्तर्व्वर्त्ति। जन्यसुखं जीवात्मनो विशेषगुणान्तर्व्वर्त्ति। तच्च शुभादृष्टजन्यं धनमित्रलाभारोग्यमिष्टान्नपानपुरीषोत्सर्गपुत्त्रादिजन्मतत्पाण्डित्यकान्तासम्भोगादिजन्यञ्च तस्य द्विक्षणस्थायित्वं स्वोत्तरोत्पन्नानुभवनाश्यत्वात्। सुखाद्यपरागेणैवात्मनो मानसबोधः। सुखं तदुपायश्चेष्टः। बालस्य स्तन्यपानप्रवृत्तौ सुखसाधनत्वज्ञानं हेतुः तत्र सुखस्यैवेष्टत्वम्। दुःखजनकगमनादिप्रवृत्तौ सुखोपायो धनं तदेवेष्टं तत्साधनत्वज्ञानमेव हेतुः। यागादिप्रवृत्तावपि पारलौकिकसुखसाधनत्वज्ञानं कारणं सुखोपायस्वर्गादिरूपेष्टसाधनत्वज्ञानमपि कारणम्। सुखस्य कालावच्छेद्यत्वं शरीरावच्छेद्यत्वञ्चातोऽव्याप्यवृत्तित्वं शरीरैकदेशावच्छेदेन दुःखसम्भवेऽप्यन्यदेशावच्छेदेन सुखसम्भवात् एकक्षणावच्छेदेन जीवस्य दुःखसम्भवेऽपि क्षणान्तरावच्छेदेन सुखसम्भवाच्च तत्तु विस्फोटकवतो मिष्टान्नभोजनादौ द्रष्टव्यम्। इति तार्किकाः ॥ * ॥

तत्कारणं यथा,—

"सुदिनं दुर्द्दिनं शश्वद्भ्रमत्येव भवे भव।
सर्व्वेषां प्राक्तनानाञ्च हे बीजे सुखदुःखयोः ॥
सुखाद्भवति हर्षश्च दर्पः शौर्य्यं प्रमत्तता।
राग ऐश्वर्य्यकाम्ये च विद्वेषश्च परस्परम् ॥
दुःखात् शोकात् समुद्वेगाज्ञ्यं नित्यं प्रवर्त्तते।
इतान्यं तानि सर्व्वाणि इते बीजे महेश्वर ॥
सुदिनं दुर्द्दिनञ्चैव सर्व्वं कर्म्मोद्भवं भव ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।४३।४८-५१

तस्य कारणान्तरं लक्षणञ्च यथा,—

"रागद्वेषादियुक्तानां न सुखं कुत्रचित् द्विज।
विचार्य्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥
यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत् सुखम् ॥
शरीरमेवायतनं दुःखस्य च सुखस्य च।
जीवितञ्च शरीरञ्च जात्यैव सह जायते ॥
सर्व्वं परवशं दुःखं सर्व्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।
सुखं दुःखं मनुष्याणां चक्रवत् परिवर्त्तते ॥"

इति गारुड़े ११३ अध्यायः ॥ * ॥

सर्व्वभूतसुखकर्त्तव्यत्वं यथा, देवीपुराणे देवीसंवत्सरवलिहरणाध्याये।

"कृमिकीटपतङ्गेषु भूमौ दध्योदनं क्षिपेत्।
सर्व्वदा सर्व्वभूतानां सुखं कार्य्यं सुखार्थिनाम् ॥"

सुख-दुःख-साधनानामस्थिरत्वं सुखस्य मनोविलासमात्ररूपत्वञ्च यथा,—

"वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च।
कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः ॥
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते।
तदेव कोपाय ततः प्रसादाय च जायते ॥
तस्माद्दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम्।
मनसः परिणामोऽयं सुखदुःखोपलक्षणः ॥"

इति विष्णुपुराणे। २। ६। ४३-४५ ॥

"सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ॥"

इति मृच्छकटिकम् ॥ * ॥

तद्वैदिकपर्य्यायः। शिम्बाता १ शतरा २ शातपन्ता ३ शिलुगः ४ स्यमकम् ५ शेवृधम् ६ मयः ७ सुम्नम् ८ सुदिनम् ९ शूषम् १० शुनम् ११ शग्मम् १२ भेषजम् १३ जलाषम् १४ स्योनम् १५ सुम्नम् १६ शेवम् १७ शिवम् १८ शम् १९ कम् २०। इति विंशतिः सुखनामानि ॥ इति वेदनिघण्टौ। ३। ६ ॥ * ॥ त्रिविधसुखं यथा,—

"अभ्यासाद्रमते यत्र दुःखान्तञ्च नियच्छति।
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ॥
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ १
विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥ २
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥" ३ ॥

इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

स्वर्गः। इति मेदिनी ॥ वृद्धिनामौषधम्। इति राजनिर्घण्टः ॥ जलम्। इति केचित् ॥ सुखविशिष्टे, त्रि। यथा,—

"शस्तञ्चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च।"

इत्यमरः ।१।४।२६ ॥

"पापपुण्यशब्दौ सुखादयः शस्तान्ताश्च गुणे यथोक्तलिङ्गाः उपचारात्तद्वति द्रव्ये विशेष्ये वर्त्तमाना वाच्यलिङ्गाः। यथा,—

"पापा ऋतुमती कन्या पापो राजाप्यरक्षकः।
पापं व्याधकुलं हिंस्रं पापो विप्रश्च सेवकः ॥'
पुण्यं तीर्थं पुण्या नदी पुण्य आश्रमः। सुखा भूतिः सुखो वासः सुखं कामिकुलम्।" इति भरतः ॥

सुखकरः, त्रि, (सुखं कर्त्तुं शीलमस्येति। सुख+कृ+टः।) सुकरः। यथा। कर्त्तुं सुकरैः सुखकरैरित्यर्थः। इति मुग्धबोधटीकायां दुर्गादासः ॥

सुखगः, त्रि, (सुखेन गच्छतीति। गम्+डः।) सुखेन गमनकर्त्ता ॥

सुखङ्करी, स्त्री, (सुखं करोतीति। कृ+खच्। मुम्। ङीप्।) जीवन्तीवृक्षः। इति राजनिर्घण्टः ॥ सुखकरी च ॥

सुखण्डुणः, पुं, शिवखट्टाङ्गः। इति त्रिकाण्डशेषः।

सुखचरः, त्रि, सुखगामी। सुखेन चरति इत्यर्थे टप्रत्ययेन निष्पन्नः। ग्रामविशेषे, पुं। सुखेन चरति अत्र इत्यर्थे अल्प्रत्ययेन निष्पन्नः ॥

सुखचारः, पुं, (सुखेन चरत्यनेनेति। चर+घञ्) उत्कृष्टाश्वः। इति शब्दमाला ॥

सुखजातः, त्रि, (सुखेन जातः। यद्वा, जातं सुखमस्येति।) जातसुखः। यथा भट्टौ ५।३८।

"सुखजातः सुरापीतो नृजग्धो माल्यधारयः॥"

(सुखस्य जनने, क्ली, यथा, गीतगोविन्दे। १०।३

"घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातम् ॥")

सुखदं, क्ली, (सुखं ददातीति। दा+कः।) विष्णोः स्थानम्। विष्णोरासनम्। इति केचित् ॥

सुखदः, पुं, (सुखं ददातीति। दा+कः।) विष्णुः। यथा। सुखदोऽनैकदोऽग्रजः। इति तस्य सहस्रनामस्तोत्रम् ॥ तालभेदः। यथा,—

"विंशत्यक्षरसंयुक्तो ध्रुवः सुखदसंज्ञकः।
शृङ्गारवीरयोर्ज्ञेयो गुरुणैकेन मण्डितः ॥"

इति संगीतदामोदरः ॥

सुखदातरि, त्रि ॥ (यथा, बृहत्संहितायाम्। १०४। ३८।

"हरिणप्लुतशावविविक्तं
रिपुगते मनसः सुखदं गुरौ ॥"

सुखदा, स्त्री, (सुखं ददाति या। दा+कः। टाप्।) सुखदात्री। गङ्गा। यथा,—

"सद्यःपातकसंहन्त्री सद्योदुःखविनाशिनी।
सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः ॥"

इति गङ्गाप्रणाममन्त्रः ॥

स्वर्गवेश्या। इति शब्दरत्नावली ॥ शमीवृक्षः। इति राजनिर्घण्टः ॥